दिनाङ्क :-02.10.2025

प्रात: - 06:55

## मन्त्रिमंडलीय-निर्णय:

केन्द्रीय: मन्त्रिमण्डलेन ह्य: महार्घता व्ययः वृद्धे निर्णयः स्वीकृत:, तत: केन्द्रीयकर्मचारिभ्य: सेवानिवृत्त-वेतनभोगिभ्यश्च प्रत्येकं प्रतिशतः त्रिमितः महार्घताराशि: प्रदास्यते। ह्य: नवदेहल्यां मन्त्रिमण्डलीयोपवेशनानन्तरं वार्ताहरेभ्य: इयं सूचना प्रसारणमन्त्रिणा अश्विनीवैष्णवेन प्रदत्ता, तेन प्रोक्तं यत् अनेन निर्णयेन प्राय: एकोनपञ्चाशत-दशमलव-द्विलक्ष-केन्द्रीय-कर्मचारिण: अष्टषष्टि-लक्षाधिक-सेवानिवृत्त-कर्मचारिणश्च लाभान्विता: भविष्यन्ति। निर्णयोऽयं गतजुलायि-मासस्य प्रथमदिनाङ्कात् प्रभावी भविष्यति। आर्थिक-प्रकरण-सम्बद्ध-केन्द्रीय-मन्त्रिमण्डल-समित्या आदेशं इदमपि निर्णीतं यत् अष्ट-पञ्चाशत्-द्वि-षष्टि-कोटिरुप्यक-परिव्ययेन सप्तपञ्चाशत्-सङ्ख्यका: नवीना: केन्द्रीय-विद्यालया: अपि उद्घाटयिष्यन्ते। श्रीवैष्णवेन प्रोक्तं यत् एतादृशेषु जनपदेषु अपि विंशत्यधिक-विद्यालयाः उद्घाटयिष्यन्ते, यत्र अधुना पर्यन्तं कोपि केन्द्रीयविद्यालयो नास्ति। नवीन विद्यालय-उद्घाटनेन शिक्षकाणां षड्चत्वारिंशत्शतं अतिरिक्तपदानि सर्जितानि भविष्यन्ति सप्ताशीति-सहस्रं छात्रा: चापि लाभान्विता: भविष्यन्ति। सममेव केंद्रीय मन्त्रिमण्डलस्य आर्थिक समित्या आगामि-वित्तवर्षात् शारदीयशस्यानां न्यूनतम-समर्थन-मूल्ये वृद्धिः अपि अनुमता।

## आर. एस्. एस्.-नागपुरकार्यक्रमः-

राष्ट्रिय-स्वयंसेवक-सङ्घस्य शतवार्षिक-उत्सवस्य अवसरे अद्य प्रातः नागपुरस्य रेशमबाग्-नगरे पूर्वराष्ट्रपतेः रामनाथकोविन्दस्य उपस्थितौ मुख्यकार्यक्रमः भविष्यति। सरसंघचालकः डा. भागवतः विजयदशम्यां मुख्य भाषणम् करिष्यति तथा च नागपुरे अयं समारोहं द्रष्टुं देशविदेशात् च विशिष्टातिथयः आमन्त्रिताः सन्ति। अस्मिन् वर्षे विशेषकार्यक्रमे प्रायः एकविंशतिसहस्रं यावत् स्वयंसेवकानां उपस्थितेः संभावनास्ति।

## गोयल- भारत-यूरोपीय-मुक्त-व्यापार:

केन्द्रीय-वाणिज्य-उद्योग-मन्त्री पियूष्-गोयलः अवदत् यत् भारत-यूरोपीय-मुक्त-व्यापार-सङ्घस्य व्यापार-आर्थिक-सहभागित्व-सन्धिः यूरोप्-देशेन सह भारतस्य आर्थिक-सम्बन्धस्य निर्णायकः क्षणः अस्ति। ह्यः नव दिल्ल्यां भारत-ई. एफ्. टि. ए. समृद्धि-शिखरसम्मेलने स्वस्य मुख्यभाषणे श्रीगोयलः उक्तवान् यत् एतत् मित्रेषु विश्वसनीय-सहभागितायाः प्रतिनिधित्वं करोति।

## शास्त्रि -गांधि-श्रद्धाञ्जलि:

समग्रराष्ट्रमद्य राष्ट्रपितु: महात्मागांधिन: षड्-पञ्चाशदधिकैकशततमे जन्मजयन्तवसरे तस्मै श्रद्धाञ्जलिं समर्पयति। अत्रावसरे सकलदेशे विदेशेषु च भारतीयाभियानै: नैके कार्यक्रमा: आयोज्यन्ते। राष्ट्रिय-राजधान्यां नवदिल्ल्यां राजघाट- स्थितस्य महात्मागान्धिन: समाधिस्थले सर्वधर्मप्रार्थनासभापि आयोज्यते। राष्ट्रमद्य पूर्वप्रधानमन्त्रिण: लालबहादुर शास्त्रिण: जन्मजयन्त्यवसरेऽपि श्रद्धाकुसुमानि समर्पयति।

राष्ट्रपति:-गांधी

राष्ट्रपतिपदासीना द्रौपदीमुर्मु: जनै: सत्य-अहिंसा-प्रेम-पवित्रता-इत्येतेषां मूल्यानि आत्मसात्कर्तुम् आग्रहं कृतवती अपिच महात्मा-गान्धिन: स्वप्नानां भारतस्य विचारेण सह देश-समाजयो: विकासगतिं नैरन्तर्येण समेधितुं आह्वानमपि कृतवती। राष्ट्रपितु: महात्मा-गान्धिन: षड्पंचाशदधिकैक शततमे जन्म-जयन्त्यावसरे अनया प्रोक्तं यत् सत्याहिंसायो: प्रबलानुयायी राष्ट्रपितु: समग्र-जीवनं मानवतायै कल्याणप्रद-सन्देशरूपेण प्रतिष्ठितमस्ति।

विजयदशमी पर्व

अद्य देशे सर्वत्र विजयदशमी-दशहरा उत्सवः आचर्यते। भगवतः श्रीरामस्य रावणोपरि विजयस्य स्मरणे अयं उत्सवः आचर्यते । अस्मिन् दिने नवरात्रि-दुर्गापूजायाः समापनम् अपि भवति । अत्रावसरे राष्ट्रपतिः द्रौपदी मुर्मुः देशवासिभ्यः शुभकामनाः प्रदत्तवती। राष्ट्रपतिः द्रौपदी मुर्मू दिल्ल्याः रक्तदुर्गस्य माधवदासपार्क् इत्यत्र दशहरा-उत्सवे भागं ग्रहीष्यति। प्रधानमन्त्री नरेन्द्रमोदी राष्ट्रिय-राजधान्यां आईपी-एक्स्टेन्शन्-रामलीला-समित्या आयोजिते दशहरा-उत्सवे भागं ग्रहीष्यति। प्रधानमन्त्री पूर्वीय-दिल्ल्याः पटपडगंज-क्षेत्रे सायं प्रायः षड्वादने प्रापष्यति, तथा च असत्यस्य उपरि सत्यस्य विजयस्य रूपेण पारम्परिक-रावण-दहन-समारोहे भागं ग्रहीष्यति।